# Surya Stuti Mohasurakrita

# મોહાસુરકૃતા સૂર્યસ્તુતિઃ

## Document Information

Text title : Surya Stuti Mohasurakrita

File name : sUryastutiHmohAsurakRRitA.itx

Category : navagraha, mudgalapurANa, stuti

Location : doc_z_misc_navagraha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 6 | 3.6. 17-32||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# મોહાસુરકૃતા સૂર્યસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
મોહાસુર ઉવાચ ।
નમઃ સૂર્યાય તપતાં શ્રેષ્ઠ તે સર્વરૂપિણે ।
ભાનવે ભાસ્કરાયૈવ રવયે તે નમો નમઃ ॥ ૧૭॥
કર્મણાં ફલદાત્રે તે કર્મમૂલધરાય ચ ।
કર્માકારાય દેવાય સ્વાત્મને તે નમો નમઃ ॥ ૧૮॥
નાનાભેદધરાયૈવ નાનાભેદવિવર્જિત ।
સદામૃતસ્વરૂપાય પરમાત્મન્નમોઽસ્તુ તે ॥ ૧૯॥
અનન્તાપારરૂપાય જગજ્જીવનમૂર્તયે ।
સત્યાય સત્યપાત્રે તે દિવાકર નમોઽસ્તુ તે ॥ ૨૦॥
ત્રયીબોધાય તે ત્રય્યૈ ત્રયીકર્મપ્રવર્તક ।
સર્વાહઙ્કારમૂલાય સદાહઙ્કારનાશિને ॥ ૨૧॥
જ્ઞાનદાત્રે પ્રકાશાય પ્રકાશાનાં વિશેષતઃ ।
અનાદયે મહેશાય પરેશાય નમો નમઃ ॥ ૨૨॥
વૃષ્ટિબીજાય સર્વેષાં કાલકર્મપ્રવર્તક ।
માયાધારાય માયાયાશ્ચાલકાય નમો નમઃ ॥ ૨૩॥
કિં સ્તૌમિ ત્વાં દિવાનાથ આત્માકારધરં પ્રભો ।
તથાપિ જ્ઞાનપ્રામાણ્યાત્ સંસ્તુતોઽસિ નમામ્યહમ્ ॥ ૨૪॥
યદિ તુષ્ટોઽસિ દેવેશ વરં દાતું સમાગતઃ ।
તદા મે મરણં સ્વામિન્ન ભવેન્માં તથા કુરુ ॥ ૨૫॥
નામરૂપધરં સર્વં તસ્માન્ મૃત્યુર્ન મે ભવેત્ ।
રાજ્યં ત્રૈલોક્યસંસ્થં યદ્દેહિ તજ્જગદીશ્વર ॥ ૨૬॥
આરોગ્યાદિસમાયુક્તાં દેહસત્તાં મહાપ્રભો ।
સર્વાતિગાં ચ મે દેહિ સઙ્ગ્રામે વિજયં તથા ॥ ૨૭॥
યદ્યદિચ્છામિ દેવેશ તત્તન્મે સુલભં ભવેત્ ।

ત્વદીયપાદપદ્મે તે ભક્તિં દેહિ મહાપ્રભો ॥ ૨૮॥
એવમુક્ત્વા મહાદેવં ભાસ્કરં પ્રણનામ સઃ ।
ઉત્થાય તસ્ય સામીપ્યે સંસ્થિતો વિનયાન્વિતઃ ॥ ૨૯॥
તતઃ સ સવિતા તત્ર વિસ્મિતસ્તમુવાચ હ ।
ત્વયા યત્ પ્રાર્થિતં દૈત્ય તત્ સર્વં લભસે મહત્ ॥ ૩૦॥
(ફલશ્રુતિઃ)
સૂર્યા ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
સર્વકામપ્રદં ચૈવ ભવિષ્યતિ સુશ‍ૃણ્વતે ॥ ૩૧॥
ઇત્યુક્ત્વાન્તર્દધે દેવઃ સવિતા સ્વસ્થલં યયૌ ।
દૈત્યોઽપિ હર્ષિતોભૂત્વા સ્વગૃહં પ્રજગામ હ ॥ ૩૨॥

ઇતિ મોહાસુરકૃતા સૂર્યસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૬ । ૩.૬। ૧૭-૩૨॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 6 . 3.6. 17-32..

Proofread by Yash Khasbage, Preeti Bhandare

*Surya Stuti Mohasurakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*